श्री
स्तन्यधारास्तवः

अकृत्वा सान्निध्यं कृपणहृदि मे शैलतनये
अनत्वा वात्सल्यस्तबकितकुचा मे सकृदपि।
अदत्वा सौभाग्यं त्रिपुरशरणं दिव्यचरणं
शिलालीलालीना हससि सततं मे मनुजताम्॥

न दृष्टा न ज्ञाता श्रुतिभि रसि मातेति विदिता
तथा मातर्मातेत्युपगतपदामूढ्शसुतैः
तदा न स्सार्थक्यम् भवति लघुकस्तूरिविभवा
लताकस्तूरीव स्फुरसि यदि मातृत्वमधुरा॥

स्तनन्धयः

मेल्लचेर्वु वेङ्कटसुब्रह्मण्य शास्त्री

धारुः

रा मो रा

श्री
स्तन्यधारास्तवः

अकृत्वा सान्निध्यं कृपणहृदि मे शैलतनये
अनत्वा वात्सल्यस्तबकितकुचा मे सकृदपि।
अदत्वा सौभाग्यं त्रिपुरशरणं दिव्यचरणं
शिलालीलालीना हससि सुततां मे मनुजताम्॥

न दृष्टा न ज्ञाता श्रुतिभि रसि मातेति विदिता
तथा मातर्मातेत्युपगतपदामूदृशसुतैः
तदा न स्सार्थक्यम् भवति लघुकस्तूरिविभवा
लताकस्तूरीव स्फुरसि यदि मातृत्वमधुसा॥

स्तनन्धयः

मेल्लचेर्वु वेङ्कटसुब्रह्मण्य शास्त्री

धारुः

रा मो रा

श्री

स्तन्यधारास्तवः

मेल्लचेर्वु वेङ्कटसुब्रह्मण्य शास्त्री

प्रथम मुद्रणं : श्रीपार्थिवनामसंवत्सर भोगि पर्वदिने (१३-०१-२००६)
प्रतिलिपयः : ३००
पृष्ठसङ्ख्या : २८
मूल्यम् : मातृस्तन्यम् अमूल्यम्

© 1. RAVI MOHANA RAO,
4-103, I.L.T.D. Colony Extn.,
Kothapet, Chirala - 523 157, Prakasam Dist. A.P.
Cell : 9440 11 5411

2. M.V. SUBRAHMANYA SASTRY,
Lecturer in Sanskrit, S.G.V.O. College,
Timmasamudram,
Naguluppalapadu Mandal,
Prakasam Dist. A.P.

DTP by
VIKRAM GRAPHICS
Opp. M.R.O. Office
CHIRALA - 523 155
Ph.: 08594 - 233242

Printed at
SOWMYA OFFSET
CHIRALA - 523 155

स्वादग्राहिका

– डॉ. श्रिष्टि लक्ष्मीकुमारशर्मा
Reader in Sanskrit, S.G.V.O. College, Timmasamudram

श्रीमतां, कवियोगीन्द्राणां प्रातस्स्मरणीयवर्तनानां ब्रह्मर्षि ताडेपल्लि राघवनारायणशस्त्रि महोदयानां शिष्याग्रेसरा अस्मदीया विद्वत्सुहृदः श्री मेल्लचेर्वु वेङ्कटसुब्रह्मण्यशास्त्रिमहाशयाः कवितासरस्वत्याः गळसीमनि अभिनवमेकं हारं स्तन्यधारास्तवनाम्ना समार्पयन्। एते च नैसर्गिकतार्किकप्रज्ञाः कवयः संस्कृतान्ध्रान्लकवितामर्मज्ञास्सन्तः स्वयं सरस्वतीस्तन्यधारां स्वादं स्वादं बालभूयंगताः सुब्रह्मण्यसुधियः पुनःपुनरनुभूतिपवनाध्मातया स्वया ***स्वादग्राहिकया*** (Through Straw) श्रीमातृस्तन्यधाराफेनबुद्बुदधवलिमानं माधुर्येण समं साहित्यजगति वितन्वन्तीति मोमुद्यते नश्चेतः। पदाधानोद्धरणात्मकावेक्षणप्रक्रिया माद्रियमाणा एते कवितल्लजाः भावनानैशित्यं संपाद्य तद्भावनालहर्या मस्मान् परिप्लावयन्ति। **भावनाहि कवितायाः मूलं फलं च।**

शताधिकपद्यप्रायेऽस्मिन् स्तुतिकाव्ये प्रतिपद्यं कमपि हृद्यं चमत्कारमातनोति लोकोक्तीनां ध्वनीनामलङ्काराणां च आकर एष स्तवराजः।

कविवरा इमे श्रीदेवीस्तन्यधारास्वादसुखं स्वयमनुभवन्तः–सर्वान्तर्यामिन्यपि भगवति विषादे सति, पुरान्तके, दिगम्बरगतौ जगदवने तटस्थे सति भगवत्याः स्तन्यधारयैव जगत् पुष्यति इत्या विष्कुर्वन्तः भवान्यां वैलक्षण्यं परमेश्वरात् दर्शयन्तः व्यतिरेकालङ्कारश्रिया कविताश्रियं पुष्णन्ति।

करारविन्देन पदारविन्दं मुखारविन्दे विनिवेशयति वटपत्रशायी बालो मुकुन्दः। स्वयं भगवानपि, तथा किमर्थं पदाङ्गुष्ठं मुखे निवेशयति इत्युक्ते – वाचंयमैरेव स्थीयते सामान्यजनैः। परं कवयोऽत्र एकां मधुरां हेतूत्प्रेक्षां भ्रान्तिध्वनिं च आविष्कृतवन्तः। भगवान् वटपत्रशायी आद्यन्तशून्यः कुतो वा जातः। सच वटपत्रे इतस्ततः परिलुठन् स्वयं भगवानपि जीवनसहजात स्तन्यधारास्वाददुर्लिप्सया जननीमलभमानः प्राकृतजनइव शिशुसुलभमौग्ध्येन जननीपयोधराग्रभ्रान्त्या स्वपदाङ्गुष्ठास्वादमकार्षीत् इति भ्रान्तिध्वनिसंवलितः हेतूत्प्रेक्षालङ्कारः व्यञ्जितः।

आध्यात्मिके लघुकाव्येस्मिन् बहूनां लोकोक्तीनां उपयोगः, आन्ध्रदेशप्रसिद्धेषु मातृभिरुच्यमानेषु भूश्चि इत्यादिषु भूः+चित् इति नैरुक्तं सचमत्कारं दर्शनम् इत्यादयो बहवोविषयाः पाठकलोकमावर्जयन्ति इतिशम्। *** *

उपरि युक्तं यदुक्तं श्रीशर्मभिः अध्येतत्कवि तत्सर्वं सत्याकरोमि।

– डॉ. मुळ्ळपूडि विश्वनाथशास्त्री
Reader in Sanskrit, S.G.V.O. College, Timmasamudram

महाभागौ ! युवाभ्यां, आभ्यां कृतज्ञोस्मि। - रचयिता

"ఓష్ఠ్య"

1) ఏబదియేండ్ల వాడనని యీ మహిలో నొక పెద్దవానిగా
నా బ్రతుకీడుచుంటిని ఘనంబగు నీదు వయస్సు ముందటన్
నా వయసెంతదే జనని! నన్ను కడుంగడు చిన్నవానిగా
భావనజేసి యీ కవిత వ్రాసితినే, గమనించి కావుమా!

2) జీవుడు – వానిదే వయసు? శ్రీజననీ! పరమేశునంశతో
నీవలలోన జిక్కిన యనిత్య శరీర నివాసుడేగదా!
ఆ "వల" నుండి యీ తనువు నందునె తప్పుకొనంగజూచు నీ,
జీవుడు నెప్పుడుందమకు చిన్న నిసుంగగుగాదె చెప్పుమా!

3) వలపున బడ్డవాడఖిలబంధ విమోచను డీశ్వరుండు, నీ
"వల" కిటుబడ్డ వాడఖిల బంధ విమోచనుడైన జీవుడున్
కలిసె విశేషణంబులు జగజ్జననీ! మఱి భేదమేలనో?
తెలియును నీ స్తనద్వయికి, తెల్విని కొంచెము ధారవోయుమా!

4) బిందువై సృష్టికి పెద్దవై యానాడు పరవస్తువని కీర్తి బడసినావు
సంఛన్నయుగళవై చణకసమానవై కామేశ్వరి యనంగ గదలినావు,
నిలిచి ద్విపత్రివై తొలిదంపతుల ఠీవి అర్ధనారీశులై యలరినావు,
సకల చరాచర స్థపతికి పత్నివై శ్రీజగజ్జననిగా చెలగినావు,

నీవు కన్నట్టి మావంటి జీవులందు
మాత! ఏల? అవిద్యగా మారినావు
హే విసర్గ సమస్తనీ! యిప్పుడైన,
బిందు వొక్కటి నాపైన చిందనిమ్ము.

5) స్తనములనంగ ద్వైతగతి, స్తన్యము ద్వైతవిహీనవస్తువే,
స్తనములు చంద్రభాస్కరులు స్తన్యము భాస్కరతేజమే గదా
స్తనములు కావ్యగీతములు స్తన్యము నక్షరమోదధార, నీ
స్తనములె "భుక్తిముక్తుల" నొసంగెడు "బ్రహ్మము"లంచు గొల్చెదన్.

श्री
स्तन्यधारास्तवः

1) हे नित्यप्रसवित्रि! ते स्तनयुगं, धाराधरह्रीकरम्
क्लीं मध्याकृति मादृगादरगृहीतास्वादितं भावये।
श्रीपीयूषमुपास्य यस्य कवय स्वैम्बीजवाजीकृताः
अत्रामुत्र जयन्ति हन्त! सुमनस्सौराज्यराराजिताः॥

2) न दृष्टा नज्ञाता श्रुतिभि रसि मातेति विदिता
तथा मातर्मातेत्युपगतपदामूदृशसुतैः
तदा न स्सार्थक्यम् भवति लघुकस्तूरिविभवा
लताकस्तूरीव स्फुरसि यदि मातृत्वमधुरा॥
(लताकस्तूरी = तवकोलम् इति ओषधि बीजम् ताम्बूलोपयोगि।)

3) वात्सल्येन विलोकनानि वचनान्यालिङ्गितानि क्षपा
याम् पार्श्वे शयितानि रोदनहरस्तन्यामृतान्यम्बिके।
मध्ये चुम्बनमार्जनानि भयतस्तन्वाः परामर्शना
न्येवं मातृगुणान् स्मरामि कृपणे, संस्मारयंस्ते मयि॥

4) भ्रूग्रीवास्थि विहङ्गिके रुचिकृतस्पर्धे धटासम्मिते,
व्यर्थं काचितदृक्पयोधरभरे स्वस्थानयोः वल्गतः।
दिव्यापाङ्गसुधामयूखरुचिभिः तापं तमो निघ्नती
ज्योत्स्नायां जननि! स्तनन्धयममुं स्तन्येन धन्यङ्कुरु॥

5) शाखास्सन्तु लसन्तु वा किसलयाः पुष्पाणि पुष्यन्तु वा
त्वद्वक्षोरुहसम्मितामृतफलेनाम्रो रसालो भवेत्।
स्थाणुर्येन नमेत् प्रसिद्धसहकारः स्यात् नगेशोप्यतः
हे एकाम्रपतिप्रिये जननि मे तादृक् फलाय स्पृहा॥

6) गण्डूषद्वयसं पय स्स्तनभवं स्वप्नेपि यत्ते पिबन्
तीर्थो 'भर्ममयादि' कन्द मकरोद्रामायणं पूरयन्।
या मह्यं च कणान् ददाविव कणेहत्याह मेतान् जुषन्
त्वां सूर्येन्दुकुचां स्तुवे द्विजशिशुप्रह्लादिधाराधराम्॥

मम गुरुः महायोगी 'श्री ताडेपल्लि राघवनारायण शास्त्रि नामा ग्रन्थकर्ता कदाचित् कुण्ठित कवित्वधारः स्वप्ने इष्टदेवताम् अपश्यत्।' साच स्तन्यं ददौ किञ्चित्। तेन उद्बुद्धधारः 'भर्ममयरम्यहर्म्य' इत्यादिपद्यम् आन्ध्ररामायणे रचितवान्। इति गाधा अनुसन्धेया।

7) अन्वक्षं शिशुरीर्यमाणकरया चाकार्यमाणोन्यया
वक्षोजोन्नतयापि नेच्छति पराङ्कारोहणं शङ्कितः।
एवं सन्ति वरप्रदाः प्रतिमतं भिन्नाः सुराः किन्त्वहं
विस्रंभी त्वयि केवलं त्वदितरान् धिक्कृत्य ते शिष्टवान्॥

8) त्वया बुद्धिर्दत्ता सकलमतिमूले! तदनुगो
ह्यहं वर्ते कुर्वे नखलु मम दोषस्य कणिका।
स्नुषाद्वेषिश्वश्रू स्सुतमिव कथं मां विजहती
वृधाबाधापात्रं रचयसि कुमातेव कठिना॥

9) "श्वश्रूमातामहीव" त्वमपि मतिवशं मां न निन्द्या हि मातः
बुद्धिस्ते सर्वबुद्धीः जनयति नुदति त्वं हि विद्याप्यविद्या।
पैशुन्येनेश्वराग्रे नकुरु नकुरु मां दोषिणं त्वं कुमाता
माभूः माभूः सुमाता भव भवसविधे मा मनिन्दं निवेद्य॥

10) देहोन्तर्बहिरंकपङ्कनिलयः तिर्यक्प्रकारा गतिः
बालोथापि मुदाङ्क मेति जननी तं शोधयित्वाश्नुते।
तस्मादम्ब शिवं विहाय जननि त्वां आश्रये वत्सलां
क्राम्यन्नस्मि पदैः विशोधय हृदा स्वस्यां समारोपय॥

11) प्रारब्धो यज्ञसूत्रे रचयितुमनसा वामदोष्णा भवत्या
जीवोहं दीर्घसूत्रः खलु बत जनको दक्षिणाङ्को नटेशः।
दत्वेवोत्सङ्ग मम्ब! भ्रमयति मुहुरुत्सारयन् लम्बयन् खे
तर्कुं मां ताप्तादैः तव पदि लुठितं धारयेः सूत्रधारि॥

यज्ञोपवीतद्वयम् दाम्पत्यसूचकम् तथा सृष्टिसूचकम्। सृष्टिः यज्ञोपवीत निर्माणसूचिता। वामभागः प्रकृतिः। दक्षिणभागः पुरुषः। जीवः तर्कु (कदुरु इति अन्ध्रे) समः। तर्कुं शिवः यज्ञोपवीतवायः अङ्के भ्रामयन् त्यजति। गौरी वामकरेण गृह्णाति भ्रामयति। तर्कुजीवः तस्याः पादसमीपे आभ्रमसमाप्ति भ्रमति। ततोयम् तया सूत्रधार्या धार्यः।

12) स्वस्मै ताम्यत आत्मजा नगणयन् चण्डीश्वरं प्रीणयन्
भ्राम्यन् भवततरो न लभ्य इति किं निर्माल्य मस्मै ददौ।
एवं स्वार्थहतात् हरात् भवति किं भिन्नेश्वरे, पूर्णता
तस्यार्धाङ्गतया त्वमेव दिश मे हारं लवं वाम्बिके॥

'स्वार्थ-स्वार्ध' - ईषत् समानोच्चारणत्वात् अभेदः श्लेषध्वनिः। अर्थ = अर्ध = 1/2. हर : भिन्नेश्वरः। प्रथमः=1, सः मायया '2' रूपया भिन्नः तस्यां प्रतिबिम्बितः '1/2' अभवत् । तत्र भिन्नेश्वरस्य = भिन्नस्य ईश्वरस्य अथवा भिन्नानां श्रेष्ठस्य अर्धाङ्गी त्वं हारं / अथवा लवं = द्वैतं वा अद्वैतं वा दातुं प्रभवसि। सतु स्वार्थेनहतः गुणितः, तव परतन्त्रः नप्रभवति।

13) लीलाः किं विषभक्षणं पुरहतिः प्रारब्धनिर्देश्यता
अन्यस्त्रीषु रतिः दिगम्बरगतिः गूढा तटस्था स्थितिः।
लीला सा हि यया दयाभरितया वैसर्गिकारम्भया
स्तन्यश्रीपरिपुष्टया जगदिदं पुष्णासि सर्वं सदा॥

14) ढक्का सूत्रततिं जटा क्रतुहतिं हारोकरोत् भाष्यकं
वेदान्तं निटलेक्षणं प्रळय माहार्यं च तन्त्रं मुखम्।
हित्वा मां इतरत्र सक्त मभवं हित्वाम्बिके त्वां श्रये
नेत्रीभूतकुचा कुचीकृतदृशा दत्से रुची र्या हि नः॥

15) अनन्वेष्टा सास्नां तव च पदबद्धामृतघटे (ओं)
वचोधेनो! किञ्चित् प्रपदगतिनेदिष्ठितमुखः।
सुधा मञ्चन् वत्सः सुरभिमिव सेवे रसनया
पराम्रष्टुं सास्नां किमुत विषकण्ठर्षभविभोः॥

16) निद्रान्तं तनयं प्रगे करुणया योपेक्ष्य सर्वं स्वयं
सज्जीकृत्य मुहुः प्रबोधयति या निर्णिज्य वक्त्रं तनुम्।
स्वादुंकार मुपादधाति वदने भोज्यामृतं वत्सला
तादृक्प्रेमनिधान मम्ब भवतीं स्वप्नेपि वाञ्छाम्यहम्॥

17) अम्बारावतरङ्गिता स्तनघटी मातु र्यदा प्रस्नुता
छिद्यन्ते खलु पाशधासपशुताः वत्सस्य मातुस्तदा।
वत्सत्वं प्रणयोपबृंहितसुधामाधुर्यमानन्दतः
स्वेच्छानृत्य ममुं भजन्ति जननीवात्सल्य मेतादृशम्॥

18) रुदन्तं श्रुत्वापि स्वसुत मलसः तं शमयितुं
पिता स्थाणुः स न्नादिशति जननी मेव कुपितः।
अतो या स्वच्छन्दं द्रुत मितरकार्याणि जहती
हृदा पुत्रं धत्ते जननि जननीं त्वां वृणुमहे॥

19) गृहातीतै रर्थैः अतिथिपुरुषै र्वा गृहमुखे
स्थिते ताते स्वैरं जननि जननी वत्ससुलभा।
पचन्ती शुद्धान्तस्थिति रुपनयन्ती रुचिकरान्
दिशन्ती च स्तन्यं वसति भवती तेन शरणम्॥

20) सृष्ट्वा यस्तनया नुपेक्ष्य रमते नन्दीश्वरः स्यादसौ
कुण्डोध्नी तृण मत्ति या स्वशिशवे सा कामधेनु र्भवेत्।
वत्सन्याय महं विधाय जननीं पीयूषधानीं सदा
नन्देयं परिवेष्ट्य किं पशुपतिं वृत्वा पशुत्वं वृणे॥

21) न रक्तिः तस्यास्मिन् रुदति न च भक्तिः बृहति मे
भयं मेस्मिन् रूढं ध्रुवमय 'महम्भाव' भिदुरः।
महामाये! मादृक्तनुज हृदयैक्यं वहसि यत्
ततोहं नित्यं ते हृदयसिचयाकर्षणमतिः॥

22) 'कङ्गारू' मृगडिम्भकोम्ब जननीगर्भे च गोणीस्थले
उत्पन्नः कृतडोलिकः कृतगृहः प्रेङ्खोलयन् लङ्घयन्।
भुञ्जन् बालतृणं भयेन सहसोत्प्लुत्याप्नुते गोणिकां
एवं भीतसुतस्य मे खलु तव क्षेमङ्कराङ्कस्थली॥

23) कुमाराणा माप्ताक्षरपरिचयानां तु जनकः
यशोविन्दु र्बन्धुर्भवतु करुणासिन्धु रपि वा।
शिशूना मस्माकं रुदितहतवाग्दर्शनधियां
उदस्यन्ती बाष्पं मधुरहृदया त्वं हि शरणम्॥

24) अस्तीत्येव स वेत्ति कश्चिदुपयोगोस्तीति जानाति च
प्रातुं दास्यति किञ्चनेति मधुरं नान्यत्तथास्तीति च।
अभ्यर्णं तदुपैति रोदिमियदीत्यम्बा मुपास्तेर्भकः
तद्वत्तादृगहं पदं तव भजे, तद्वत्कृतार्थं कुरु॥

25) अङ्केवास्तु पयोधरावरणके गर्भे जरायूर्णुते,
गर्भो मातरमत्ति मीलितदृगप्यज्ञोपि तातं न हि।
दोषो नैष हि तस्य शैशवदशा ह्येतादृगीदृक्पिता
सर्वं तत्परिशील्य मामपि शिशुं मातः कृतार्थीकुरु॥

26) गिरीशादिगर्यन्तं चलनरहितं स्पन्दयसि हे
बृहत्स्पन्दाकारे, विततभवदुत्सङ्गरसिकः।
तरङ्गैः स्पन्दानां कुटिलचटुलैः सुन्दरतया
लिपौ नादे गीते जननि कवितायां च निरतः॥

27) बाधा काचिदिहास्ति तां शमयितुं काचिन्ममास्ति क्वचित्
सा किञ्चिन्मधुरं प्रयच्छति तदा शान्तिश्च मे जायते।
यद्युन्नीतपदः नदाम्यनुपदं द्रक्ष्यामि ता माकृतिं
श्रोष्ये मञ्जुपदध्वनीनिति यथा बालस्तथोहेम्बिके॥

28) पतित्वानीवार्ये यदुपतिसमक्षं व्रजभुवां
पितृत्वान्यस्माकं सकलपितु रग्रे खलु वृधा।
प्रभुत्वान्येवं नः सकलधरणीशस्य पुरतः
स्थिरं ते मातृत्वं मम च तनुजत्वं परशिवे॥

29) लवोहं मृत्साया: इदमखिलब्रह्माण्डपटले
शवोहं निस्संख्यो मरणभयपौनःपुनिकया।
भवोहं भूयासं यदि तव लभै स्तन्यममृतं
शिवस्स्यां गृह्णीधा यदि तव कटाक्षेक्षणिकया॥

30) तप्तां मेश्रुकणद्वयीं हि पतितां याङ्घ्रद्वयी गृह्णती
दत्ते ते स्तनकुम्भमुत्तमपदैश्वर्यप्रदं सा प्रिया।
कस्माच्चिच्चिपिटत्रयीविनिमितश्रीदानकर्णात्करात्
पादाच्च त्रिपदावनिप्रदबलिस्वाराज्यपाटच्चरात्॥

31) गुणानां सर्वेषां मरुभुवि हरे को नु चिनुते
दयां वात्सल्यं वा भगवति! सुधासिन्धुनिलये।
गुणस्रोतस्विन्यां त्वयि हि विहरन्नेष लभते
दयावात्सल्याख्यौ ध्रुवममृतमाणिक्यकलशौ॥

32) न कामः कामारेरुरसि मरुभूमौ सभसिते
भुजङ्गै राकीर्णे जननि विरसौन्नत्यकलिते।
उरस्ते कस्तूरीघुसृणकलितं मौक्तिकयुतम्
सुधाधारं सेवे सुरभिशुभकुम्भोज्ज्वलतलम्॥

33) वक्षोजौ कुरुविन्द सुन्दरघटौ उद्भिज्जरागायितौ
मात स्ते स्मितमञ्जरी मम तमोहन्त्री सुधांशुप्रभा।
मन्ये तेन तवाम्ब, मूर्धनि कला मिन्दो स्सुधापात्रिकां
काचीया मुभयत्रपातुमुचितां अस्मभ्य मुच्चावचाम्॥
उभयत्र पातुम्=उभयपार्श्वयोः पातुम् सचूचुकम् काचपरिकरमिव।

34) अनेकेषा मन्ते जननि जननानां च पुरुषे –
ष्वनेकेष्वेकस्याप्यसुलभतमाद्वैतपदवीम्।
कथङ्कारं याचे कनककलशद्वैतघटितं
सुतोदर्कं त्यक्त्वा तव हृदयनिक्षेप ममृतम्॥

35) घनोत्तुङ्गे गात्रे तव गिरिसुते वत्ससुलभौ
महालावण्यायां त्वयि जलधिजे पुत्रमधुरौ।
स्तनौ पादौ ते, त्वां मम पुरत आनेतुमनसौ
रथाङ्गश्रीरङ्गौ वहसि विनतौ पातुमुदितौ॥

36) मातस्ते बहुळा लसन्त्यवयवा हस्ताक्षिशीर्षादयः
वत्से निष्करुणाः उपेक्षितजगत्त्राणाः वृथासाधनाः।
यौतु प्रस्नुतदिव्यदुग्धमधुरौ वत्सार्थ मेवोदितौ
तौ द्वावेव कुचौ, सुतास्तु बहुळाः का वा दशा मादृशाम्॥

37) महाराज्ञी माता भुवनभरनिर्वाह विवशा
यथापुत्रं तद्वद्दिशसि खलु धात्रीहृदयके ।
भवत्वेवं याचे, क्वचिदपि कदाप्यम्ब तनयं
रुदन्तं तुभ्यं मां सकृदनुगृहाण स्वयमिति॥

38) क्षमामूर्त्या मात्रा शिशु रुपहितोप्यम्ब करयोः
पदै र्वेगेन प्रत्युरस मभिहन्तीति प्रकृतिः।

अतो नाहं दोषी जननि यदि सा पातयति तं
तदा त्वं निर्दोषा ह्यधिधरणि माम्पातितवती॥

39) त्वं धेनु र्नहि वत्सघट्टितकुचा दोग्धुं मुखप्रं पयः
नो मार्जाल्यपि गोप्तु मंब तनयान् भद्रं वहन्ती मुखे।
नो मर्त्या च हृदा सुतान् सुखयितुं त्वं राजराजेश्वरी
त्वत्सिंहासनपादसन्निधिमृते शोके कथं स्पन्दसे॥

40) उदन्या वा मातः निरत मशनाया तपति मां
पयस्यन् तुङ्गौ ते हृदयकलशावेव कलये।
भवेयं चेत् विघ्नः तव जननि विश्वावनविधौ
यथाङ्गुष्ठास्वादो भवति सरसः शिक्षय तथा॥

अङ्गुष्ठः = परमात्मनः, प्रतीकः। बालैश्च स्तनप्रतीकतया नित्यं पीयते च 'अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः'।

41) शयानो डोलायां जननि वटपत्रे पयसि च
भ्रमन्नूर्मिश्रेण्यां क्वचन जननी दृश्यत इति।
अदृष्ट्वा त्वां बालो हरिरपि हताशः स्तनरसे
पदास्वादे व्यग्रः वयमपि सपीत्या तदनुजाः॥

42) महासौन्दर्या वा भवतु जननी पट्टमहिषी
कृशा वा स्थूला वा भवतु सगुणा काम मगुणा।
पयःपारावारप्रतिमपरिणाहस्तनयुगी
मुखप्रं वृष्टाचेत् जननि! जननी सा खलु शिशोः॥

43) लावण्यामृतसिन्धु रस्तु सुषमापूर्णाङ्गचङ्गेरिका
कौसुम्भाम्बरधारिणी च भवतात् कुम्भातिशायिस्तनी।
सर्वज्ञाच सुताय सर्वसुदतीसार्धक्यसन्धायकं
मातृत्वापररूप मौरसपयः दद्यात्, न चेत् सा न सा॥

44) अन्तर्वद्गजभामिनीसमतनूः स्यात् जङ्गमाद्रिप्रभा
खड्गस्त्रीपरिणाहजित्तनुभरा कीशोपमावाम्बिका।
मातु स्सुन्दरतास्तु मास्तु फलितं किं नाम? वक्षस्स्थली
तस्या यद्यमृतोन्नता क्षरति चेत् सौन्दर्य मेतद्भवेत्॥

45) अबिन्दुर्बिन्दुर्वा भवतु विदितः अद्वैत मवतात्
न च स्पन्द स्तस्य प्रभवति तृषं मे शमयितुम्।
विसर्गाकारश्रीहृदयविकसद्बिन्दुविभवे
त्वमा अस्पन्दाचेत् मयि रुदति किं द्वैतफलितम्॥

46) आदौ मातर मेव वेत्ति तनयः तत्प्रत्यभिज्ञाकराः
डोलालालन मङ्कपालन मुरःपीयूषदानोत्सवः।
तच्छून्यो हि पिता तथा न गणितः मातः! पितुर्दुर्दशां
संवीक्षस्व चल त्वरस्व तनयं गूहस्व! मा मादरात्॥

47) किं नौ निर्गुणता निरावरणता मात र्ममावेक्षणे
प्रत्यूहौ भवतः, तथा न भुवने साक्ष्यं मया दृश्यते।
धेनुः निर्गुणवत्स मप्युपचरन्ती निर्गुणा दृश्यते
माता चोळ मपास्य सिञ्चति पयः पुत्राय सद्वर्मणे॥

48) अवर्षिन्त्री स्याच्चेत् जलदपटली क्वास्ति भुवनं
यदि स्यान्मार्ताण्डः किरण कृपणः क्वास्ति नयनम्।
सवित्री चे च्चण्डी पिशुन हृदया क्वास्ति तनुजः
स्वयं नादाकारा प्रतिवदसि नोचेत् क्व रुदितम्॥

49) विश्वारम्भमहिष्ठितस्य करुणादूरस्य मायाविनः
भर्तुः दोषचयं निगीर्य महिता माये त्यकीर्तिङ्गता।
कष्टारम्भकनिष्ठितस्य करुणापात्रस्य मुग्धस्य मे
पुत्रस्य व्यपनीय दोषनिचयं मातेति कीर्तिं भज॥

50) लालादूषितवक्त्र मप्यविरतं क्रोशन्त मप्युद्धतैः
हन्तारं च पदैः मलादिमलिनं व्याध्यादिभिः दूषितम्।
बालं पुत्रक मादरात् विदधती शुभ्रं यथाशक्ति या
चुम्बन्ती हृदयामृतं दिशति सा माता हि शक्तेम्बिके॥

51) न भीतो गम्भीरा दचलगगना त्पाररहितात्
न वा भीतो भूमेः निरवधिनिरादिभ्रमगतेः।
यथा भीतो नादप्रकृतिरिति निस्सीमकरुणे
त्यधीताया मौनात् अविदितजनन्या स्तवशिवे॥

52) अकृत्वा सान्निध्यं कृपणहृदि मे शैलतनये
अनत्वा वात्सल्यस्तबकितकुचा मे सकृदपि।
अदत्वा सौभाग्यं त्रिपुरशरणं दिव्यचरणं
शिलालीलालीना हससि सुततां मे मनुजताम्॥

53) तत्तत्त दितीरितं प्रथम मज्ञातार्थ मेकाक्षरं
निस्स्वार्थं तनुजेन लोकजननी 'तातेति चात्तेति च'।
श्रुत्वा नन्दति नन्दयत्यतितरां त्वं कासि मे मेत्यहं
मात्रर्थं कवयामि मात रमुधा कस्मान्मुधा मे कथा॥

54) 'अम्बाम्बाम्बेति' नित्यं मम हि रसनया काकली प्राप्तसख्या
प्रेमस्तेमावलोक्यीकृतशिखरयुगी चोलगुप्ता कुचश्रीः।
सन्तोषस्फारपूरोज्ज्वलनयनयुगी ते मे मेक्ष्णोः वयस्या
शुष्कं मे वक्त्र मेवं सुचिरमिति कियत् भाग्यदौर्भाग्यतौल्यं॥

55) शूर्पस्थां मृतवत्सचर्मरचितां चञ्चां विलोक्यादरात्
उद्युङ्क्ते हि पशुश्च धेनु रमृतां कर्तुं धुनाना गुणम्।
शूर्पाकारविशाखयोपगमितं द्वन्द्वेन सन्दंशितम्
मान्दृष्ट्वाऽनमृतं समक्ष ममृतीकर्तुं कथं शङ्कसे॥

56) चकोरार्थं चान्द्रीं रचयसि दयापूर्णहृदया
विहङ्गार्थं मातः सृजसि घनमाला अनुरवम्।
अवर्ष स्सौवर्णं किल यतिनुता त्वं द्विजकृते
स्वजाय स्वस्तन्यं किमयि जडता दातु मियती॥

57) मातृश्रीपरिरम्भसम्भ्रमजुषां अम्बारवस्राविणां
कुन्डोध्नी स्रवति प्रियामृतरसं गव्या सुतानां मुदे।
अव्या एतदशेषबन्धजननि! प्रत्यग्विधिक्रोशितान्
अस्मान् सर्वशरण्यपुण्यहृदये स्तन्येन मान्यामहै॥

58) स्वयं तिर्यक्प्रायो जननि पददघ्नात्मवदनः
पदातीतार्थ(र्ध)स्थं तवहृदयतः स्तन्यमनिशम्।
पदद्वाराप्राप्तुं विचलितपदोहं शिशुतयाऽ
शयेना निश्श्रेणीं रचय हृदयं मय्युपनमेत्॥

आशयेन शयेन इति विभागद्वयम्। आः निश्श्रेणी इति विभागः पददघ्न = पाददघ्न / वाचकपददघ्न।

59) पयस्यन्तो वत्साः कुतुकविवशाः ओष्ठसुलभं
यथाकिञ्चिद्वस्तु स्वदितुमनस श्चूचुकधिया।
तथैव त्वद्यन्तो वय मरसमन्त्राफलजपाः
कपोलेषु स्रस्ताः अमृत मनुगृह्णीष्व जननि॥

60) मायाचेलाञ्चलेन त्रिगुणरुचिमनोहारिणाच्छाद्य विश्वं
क्रोडे गोपायसि त्वं स्तनयुगळमिषद्वैततत्वाभिरामा।
चोलः कश्चिन्निरुन्धे प्रतिभवदुरदृष्टस्वरूपः ततोहं
क्वक्वक्वेत्याकुलास्यः जननि मम मुखे चूचुकाग्रं निधेहि॥

61) स्तन्याय स्पृहयन् स्तनन्धयतया वत्सः स्वयं जन्मना
प्यन्धो मातुरुपोरसं मृगयते चुङ्कारशङ्काकुलः।

निद्रान्ती च निसर्गतो हि जननी दत्ते स्वयं चूचुकम्
त्वन्मायान्धित मात्मजं त्यजसि मां निर्णिद्रता तेमुधा॥

62) लोष्ठं चाश्म च काञ्चनं यदि लभे भुञ्जे विवेकं विना
बालोहं मुनिवत् तृणाय भवतीं मत्वेति तद्विस्मर।
मृत्सां वीक्ष्य मुखे शिशोः खलु यशोदासीत् पयोदा ततो
गोपीशीलहरोपि शौरि रभवत् गीतागुरुः तत् स्मर॥

63) पीत्वानन्यकुमारदुर्लभकुचद्वन्द्वं मनोहत्य ते
हृत्वाऽपीतकुचाम्बिके त्यपयशो मातृत्व मर्थापयन्।
बालत्वं प्रियपुत्रकत्वमपि मे सत्यापयन् पिच्छिल
स्तन्यक्लिन्नमुखः ममाम्ब कवितां वेदापयेयं कदा॥

64) सङ्कल्पै रहितोपि नित्यतपसा मूकोपि सर्वेश्वरः
यां चिन्तामणि मङ्कसीम्नि सुतयोरग्रेपि संसेवते।
या मञ्बा ममृतांशुरत्नकलिकां हृद्येव हृद्यां श्रये
सा मां मौक्तिक मम्बिका स्वहृदये धातुं कदा चिन्तयेत्॥

65) यदीतस्सन्तापैः पिबति न शिशुः मातृहृदयं
भवेत् व्यर्थीभूतामृतरससमुच्छूनकठिनम्।
स्वयन्तस्या बाधाकर मिति विदित्वा हि भवतीं
मुहुर्याचे वाचा जननि कुरु मां स्तन्यरसिकम्॥

66) बालस्य ब्रह्मरन्ध्रः स्पृशति यदि कुचोपत्यका माशु मातुः
प्राय स्तस्याःज्वरः स्यादिति भुवि विदितां किंवदन्तीं निशम्य।
अद्धा मूलप्रकृत्याः जननि तव मुदे तिर्यगात्मा कनिष्ठः
गृह्णन्नेवं मुखेन स्मरसि खलु पिबाम्यम्ब चुम्बास्यमूर्ध्नि॥

68) ज्ञानं मोक्ष मिनःददातु भवतात् बीजं प्रपञ्चस्य च
प्रज्ञाः केचिदमुं विदन्तु तपसा शृण्वन्तु तन्त्रादिकम्।

डोलायां भ्रमिजाललोलनयनः 'चिच्चोल, लोलादि' ते
शुश्रूषे मुखतीयगेय मनिशं सम्बोधनं मे धनं॥

'चिच्चोललोल' इति केनचित् गानस्य अव्यक्तेन प्रारम्भरागेण मातरः डोलायां शिशून् आन्ध्रदेशे निद्रापयन्ति। तस्यैव अव्यक्तस्य वेदान्तार्थ समन्वयः। अत्र स रागः 'यानिशा सर्वभूताना' मिति प्रपञ्चविषये निद्रापक इति मदालसागीतवत् ज्ञानविषये प्रबोधकः इति भावः। चोलः =आवरणम्।

69) डोलायाः शिखरेधवाभ्रकुहरे मौनीश्वरा ये खगाः
नित्यं भान्तु सुवर्णरम्यतनवः किं तै रलभ्यैः फलम्।
तन्मध्ये बहुधा सुधारसकिरां वात्सल्यकुल्याकरां
मातृश्री सहजाननेन्दु सुषमां वीक्षे कदेति स्पृहा॥

70) हंसा अम्ब शुकाः त्वया करुणया मन्येवधूता अपि
ब्रह्मानन्दयुता इवात्र पुरतो नृत्यन्तु डोलान्तगाः।
पुत्रोद्धारणबद्धकङ्कणझणत्कारस्फुरच्चोटिका
लास्येन स्यु रमी कथं नु सदृशा हस्तेन शस्तेन ते॥

डोलानां मध्याकाशे शिशुविनोदाय लम्बमानः छत्र तुल्यः 'चिलुकल पन्दिरि' इति आन्ध्रे व्यवह्रियमाणः शुकपिक हंसादि पक्षि पुत्तलिकाभिः सुन्दरीकृतः कश्चित् अत्र अनुसन्धेयः।

71) उत्सङ्गे तव सर्वगे वय ममी लोकाश्च लोकेश्वराः
कामं स्याम वसाम तत्र विदिताः त्वां यन्तु बंहीयसीम्।
निद्रासंवृतनेत्र आजनु रहं 'क्वक्वेति' नित्यं रुदन्
मन्ये त्वां हि दवीयसीं स्पृश हृदा नेदीयसी मे भव॥

72) डोलाया मनभीष्टमेव शयितो मध्यं मुहुः कम्पयन्
प्राप्तुं निष्पद आत्मबोधरहितोप्यम्बान्तु किञ्चित् स्मरन्।
आशां त्वां मनुते दृशा मृगयते सा क्वेति रोरुद्यते
मादृग्भ्यः खलु रोदनं बल मतो दृश्यस्व बाष्पान्तरे॥

73) अपश्यन् डोलायां शयित उदितौत्युक्यमबलः
स्मरन्नम्बां बालः क्षणमपि युगत्वेन गणयन्।
अनन्यापेक्षः सन् जननि! भुवि यद्रोदिति तथा
सुतो मातः शोचे न खलु कुशलो हेतुकथने॥

74) उल्लासस्फुरितेक्षणः कलरवैः हस्ताङ्घ्रि सञ्चालयन्।
दीपं पश्यति मोदते तदिद मित्यज्ञाततत्त्वो निशि।
बालो हं ननु विश्वदीपकलिके ब्राह्मे मुहूर्ते ज्वलां
त्वाम् सत्यं नविदन्नपि प्रभुवरे वीचिक्षिषे चक्षुषा॥

75) नित्यं धूर्जटिरम्यनृत्य चरणव्यासक्त चक्षुःश्रवे (कुण्डलिनि)
तत्पादोत्थितभौमरेणुपटलच्छन्नोस्मि बालोम्बिके!
मे नादः प्रसभं मृतः हर 'हुडुक्का' नाद सांराविणे
शङ्के हं पतितोङ्कतस्तव लुठन् पुत्रं स्मरासादय॥

76) त्रपापूर्णावा स्यात् सिचयपिहिता स्यात् कुचतटी
स्वयं मुग्धा च स्यात् जननि! जननी चेत्तु जननी।
कृपानूपा सद्यः दिशति समयासर्वजनतां
शिशोरास्ये स्तन्यं स्रवतु मयि ते सैव ममता॥

77) यन्मायासिचयेन नित्यपिहितं चान्यत्र यद्दुर्लभम्
वत्साना ममृतं तवाम्ब हृदयं हित्वा तवानुग्रहम्।
पातुं कः प्रभवेत्, स्वयं यवनिकां धूत्वाङ्गुळीभिः शिशुः
चुङ्कुर्वन् वदनेन तां मुहुरहं हर्तुं कषाम्यम्बिके!॥

78) संव्यानं शिशुडोलिकामिव विधायांसावतंसीकृते
तत्र न्यस्य शिशुं मुहुर्मुहु रुरःपीयूषभाषास्मितैः।
व्यग्रापीतरकर्मसु स्वतनुजस्यात्मार्थिनः स्वास्तितां
सूते या शबरी, महाजननि मे त्वां तादृशीं कामये॥

79) ऋजूभूते मातुः प्रतिमुखतले बाहुशयने
शयानस्सन् बालः स्नुतमुखकुचाङ्कां बृहतिकाम्।
मुहुः झंपाधूतः पदयतु तथा प्येष सपदः
सुधा मेवादत्ते जननि हृदयाळुः हि जननी॥

80) परिष्वङ्गे मातुः शयित मनुजं मुग्धनयनम्
नवं दृष्ट्वा 'स्पर्धा कलुषहृदया' भ्रातर इव।
अधो मां क्षेप्तुं ते प्रभव इव कर्षन्त्यवयवान्
सुरा मा मम्ब प्रत्युरस मवलम्बस्व निभृतम्॥
सुराः अत्र इन्द्रियरूपाः विषयेषु बलात् क्षिपन्तीति ज्ञाति स्पर्धा आरोपिता।

81) कुण्डोध्नी मपि नैचिकीम् पटुशिरस्सङ्घट्टनैः तर्णकः
कर्षं कर्ष मभीक्ष्ण मञ्चति पयो दत्ते च सा घट्टिता।
रीढा नेय महो! परस्पररतिः गाढापि गूढा "शिशुः
मात्रालीढ" इतोस्य दुर्ललितता न स्वापराधोम्बिके॥

82) अन्नप्राशनतः पुरा मम पुरः न्यास्थः ध्रुवं लेखिनीं
ते हारं पद्महंसकञ्च सहसा प्राप्ता मया लेखिनी।
क्रष्टुं ते पदहंसकं जननि, लेखिन्यैव सर्पामि हा
सुब्रह्मण्य ममुं हि हारय सुधान्नप्राशनं मे भवेत्॥

83) उद्दिश्याम्बामुदितमनसः मे वृथायासवाचः
'उंवुंवू' मित्यविदितकृतोङ्कारझङ्कारनादः।
किञ्चिच्छन्दस्यभिसरति मे वीक्ष्य चित्तं स्ववाग्भिः
निष्कर्षार्थं समुचितपदैः वाक्य माकारयन्ती॥

84) मातस्ते पदयो र्हिं हंसककलध्वानावळीमञ्जिमा
कृष्टोहं पुर आगतस्तव पुनः क्रोडाधिरोहेच्छया।
तिर्यक्प्रायगतिः पदाळिपतितः पिल्ल स्समुत्कण्ठितः
क्रोडालङ्करणस्य मेस्तु हृदयं दिव्यामृतोपायनम्॥

85) स्वेच्छासञ्चारधाराव्यसननिपतितं धिक्कृतात्मोपभोगं
जातं मातानुयान्ती प्रदिशति वदनेङ्गुष्ठमृष्टान्नसारम्।
चन्द्रादीन् दर्शयन्ती "नहिनहिनहिभिः" तांश्च निस्सारयन्ती
धत्ते ह्यात्मार्थमस्मै जननि मम कदा तादृशानन्ददा स्याः॥

86) पदैः किञ्चित्किञ्चित् स्वय मधिगतैः तेह्यभिमुखः
स्खलन् क्राम्यन् मध्ये विरतपदपङ्क्तः शिशु रहम्।
पदं याचे यत्त्वां असहज मिदं मातृसुतयोः
कदा त्वं याचे मां कुतुककृतलास्येन शिरसा॥

क्रमणाभ्यासक्रमे किञ्चित् पदक्षेपाय प्रयतमानः शिशुः मात्रा दत्तावलम्बया प्रवर्त्यते पुनः पुनः पदप्रसाराय। अत्र पद शब्दस्य 'वाचक शब्दः' इति अर्थः कवि पक्षे।

87) धात्री मामलकैः स्वजैः तुलसिकां पत्त्रैः जलैः जाह्नवीं
हारिद्रं घुसृणेन दन्तिवदनं नीराजनेनाननं।
सेवन्ते हि यथोपचार विधिना शब्दस्वरूपे तथा
सेवेय स्तिमितैः पदैः त्वदुदितैः त्वामम्ब हेरम्बवत्॥

88) नाद श्छन्दसि वर्धते न तु पदं सम्यग्नवार्थोमिथः
ध्यानं हृद्यभिवर्तते त्वयि, मनः नादानुसारं रतं।
किञ्चिद्वर्णपटोः शिशोः कलवचः श्रुत्वा स्ववाचा यथा
कर्षङ्कर्ष मुपेत्य नन्दति तथा मोदस्व वाचामम॥

89) अदत्वा स्तन्यं मे चलसि जहती मा मिति भिया
वराकैः सुप्रापं तव पद मगृह्णां मुखबलात्।
पिबन्नस्म्योङ्कारैः चलयसि पदं व्यर्थ ममुथा
न ते मे वा मोक्षः हृदय मयि यावन्न नयसे॥

91) स्तनौ स्तः पातव्या वमृतकलशा वित्यपि शिशुः
नवेत्त्यम्बा तस्मै दिशति वदने चूचुकयुगीम्।

अथाङ्गुष्ठाग्रेण म्रदिमसरळं चान्न कबळम्
कदा मातर्मह्यं दिशसि चलदोष्ठाय शिशवे॥

अङ्गुष्ठ, अन्नशब्दाभ्याम् परं ब्रह्म लक्ष्यते। सर्वसारत्वात् म्रदिमसरलत्वं अङ्गुष्ठाग्र कृतम् अपेक्ष्यते।

92) कृष्णस्येद मिदं हरेः रघुपते रेतत्सुत स्वीक्रियाः
इत्याकृष्य तवाङ्गुळीयकबलैः पुण्णासि मां दक्षिणैः।
पिण्डग्रः किमहं परस्य निरतं हे आत्मशक्ते पुनः
मा मात्मामृतभोगयोगकृतिनं कर्तासि मातः कदा॥

यदा बालः क्रीडारसिकः अन्नविमुखः तदा तेन खादयितुम् आन्ध्रे मातरः 'अयं कबलः भ्रातुः अयं कबलः कृष्णस्य - ' इति कबलान् नामाङ्कितान् कृत्वा प्रयतन्ते तथा वयञ्च रामप्रसाद इति कृष्णानुग्रह इति द्वैतभावेन कर्मफलानि अनुभाव्यामहे इति उत्लुण्ठनम्।

93) निद्रान्तं तनयं क्षुधा परिसरं विस्मृत्य मुग्धाम्बकं
वात्सत्यस्नवमानपीनहृदया कर्णे स्वरं कुर्वती।
जागर्यां अमृतं मुहुः प्रददती किञ्चिच्चकिञ्चि त्तथा
हेमातः मयि मोहनिद्रिततमे स्याः स्वादुबोधप्रदा॥

94) आहारग्रसनत्वरा विचलित ग्रीवान्तसद्यः स्खलत्
वातोद्गार विवृत्तनेत्र मनलङ्कर्मीणयत्नं सुतम्।
या मुख्यानिलवायनेन शिरसि ब्रह्मस्थलस्पर्शना
दम्बा श्वासयतीदृशी मम दशा दुर्योगतः पालय॥

आहार = हरस्थान पर्यन्तम् । हारस्थान पर्यन्तम् कण्ठपर्यन्तम् इति यावत्। मुख्यानिलः = प्राण:, मुखवायुः। यदा आहारग्रसने स्खलितकण्ठाः बालाः उद्बद्धश्वासा भवन्ति तदा मातरः तस्य मूर्धनि पृष्ठे च करस्पर्शेन, श्वासपूरणेन च सम्यक्कुर्वन्ति तथा मामपि हंसयोगादि बाधायाम् अवलम्बस्व इति अर्थान्तरम्।

95) भिक्षुः कोपि भवेत्, हरेच्च भवतः कण्ठो यदिश्रूयते
मौनी, रे, भवतात् भवानिति गिरा किं मे व्यधा पोह्यते।

क्षुत्तृड्व्याकुलमुग्धमर्त्यशिशुकः हे अन्नपूर्णे कथम्
तूष्णीं तिष्ठति चादिभिक्षुकलशं पश्यन् त्वया पूरितम्॥

96) त्वया किं मे दत्तं जननि किमभुक्तं वद मया
कुतो भिक्षोः हस्ते दिशसि भय मध्यापयसि वा?
कपाली मे मोक्षं दिशतु मम चाकिञ्चनतया
तदादावेवाहं तव हि चरणौ नौमि भरणौ॥

97) महामूर्तिं द्रष्टुं तव वय मशक्ता इति भिया
अदृश्या माता सी रिति हि विबुधम्मन्यवचनम्।
करिस्थूला माता जगति तनयं मूषकसमम्
यथालिङ्गत्येवं जननि सदयासादय शिशुम्॥

98) शिशुः किञ्चिद्भुञ्जन् मुखत इह धूत्वा शयपदैः
यथा मातुः वक्त्रे सुषिषु कुतुकी यत् मृगयते।
तथा तस्मै तैस्ते जननि मृगये श्रीश्रवणयोः
कदा तद्वद्भूया ममृतहृदयास्वादन सुखी॥

99) रुदन्तं निद्रायां प्रतिघटिक मम्बा स्वतनयं
विषण्णा पश्यन्ती किमभवदमुष्येति सभया।
चिकित्सावात्सल्यव्यवसितमति र्योपकुरुते
महामातः तादृक्प्रवणधिषणा स्या मयि कदा॥

100) मृषारोगैः बाधा मभिनयति नेत्रे चलयति
स्वकुक्षिं शीर्षं वा भृश मभिमृशत्यम्ब तनये।
हसन्ती माधुर्यं किमपि वितरन्ती च जननी
यथा विद्यासक्तं रचयति तथा मामव शिवे॥

101) स्ववक्त्रेन्दुं सूनोः नयनकुमुदे वा पिदधती
मुहुः 'भूश्चित् भूश्चिन्वि' ति वदति मातान्ध्रवनिता।

तथा किं मे दृष्टे रपहरसि ते चिन्मयमुखं
कियत्कालं 'भूर्मे' जननि? कुतुकं मे च गणय॥

आन्ध्रदेशे शिशुमातृ विनोदे मातरः शिशूनां अथवा स्वात्मनाम् नयने पिधाय सद्यः 'बूच्चि' इति अव्यक्तध्वनिभिः उन्मीलयन्ति, बालाश्च सानन्दं हसन्ति। तत्र 'बूच्चि' पदस्य किञ्चित् सार्थकतया 'भूः चित्' इति परिवर्तनम् वेदान्ते अर्थापकम् कृतम्।

102) दत्वा मे खलु तण्डुलानि कतिचित् मेषादिचक्रावने
त्वञ्चाध्री जननीव मां तनुभवं मन्ये वनीं प्राहिणोः।
व्याघ्रादप्यभयं मया प्रकटितं च स्यात् तथाप्यम्बिके
द्राङ्माहङ्कृतिमीलितेक्षणममुं केनाम्ब! नालिङ्गसि॥

बालक्रीडासु इयमेका। जननी शिशवे तण्डुलानि अदिशदिव। बालः तान् 'पाथेया - हारार्थं' स्वीचकारेव। अनन्तरम् मेषयूथ संरक्षणार्थम् गत इव, तत्र व्याघ्रात् न बिभेतीव - एवं नट्यते। तदैव सद्यः माता शिशोः मुखे 'हं' इति बलात् शब्दायते। बालः भीतः स्फुरति। तदा सा परिहसति 'किं त्वं व्याघ्रात् न बिभेषि?' इति। अत्र एतत् संसार विषये अनुवर्तितम्। व्याघ्रः मनः हं कारः=अहङ्कारः अविद्यया ख्यापितः।

103) बद्ध्वाक्षीणि पटच्चरैः दृढतरैः क्रीडोत्सुका भूतले
न्यास्थन्नो भवती तथाहि जननीं ज्ञात्वा विमुक्तिर्भवेत्।
दक्षाः केचन सोदराः हृतपटाः ते दर्शनं लेभिरे
आशार्तोस्मि पदध्वनिं दिश यथा जानेम्ब ते सन्निधिम्॥

आन्ध्रदेशे एका क्रीडाअस्ति 'दागुडुमूतलु' तत्र एका स्त्री बालेषु कञ्चित् आदाय पटलेशेन अक्षिणी बध्वा अनन्तरम् इतरान् बालान् स्प्रष्टुम् विसर्जयति। इतरो बालः यदिस्पृष्टः तदा सः बद्धाक्षः एवं क्रीडेत्। अत्र यदि प्रथमा अक्षिबन्धिनी स्त्री (माता इति तस्याः क्रीडानाम) यदिकतरेण चित् बालेन स्पृश्यते पूर्वमेव, स बालः बद्धाक्षिबालेन स्पृष्टोपि न दूषितो भवति। अत्र अविद्याकृते सर्वप्रजा नेत्र बन्धे एषा क्रीडा आरोपिता।

104) ॐकारैरनुनीय पृष्ठफलके तापज्वरार्तं सुतं
पथ्याहारपराङ्मखं प्रणयतो भुंक्ष्वेति वत्सेति च।

स्वार्थायेव हि, याचतेस्य वदने दत्ते कथञ्चित् क्वचित्
किञ्चित् तादृशमातृगोत्रलतिकाबीजायितां त्वां वृणे॥

105) रजश्छन्ने नेत्रे तम उभयसङ्कोचजनितम्
कुमारोयं सास्रः भ्रमति सनिमेषश्च विमृशन्।
विशालीकृत्यामू विमलय यथाम्बा भुवि तथा
द्रुतं ते फूत्कारैः सम ममृतगण्डूषणशतैः॥

106) आलिङ्ग्याग्रजमात्मनो हि पुरतः वामस्मिता मम्बिकां
दृष्ट्वा क्रोशति क्रोशमेति तनुजः तत्पक्षपातार्दितः।
मात्सर्यादहमीदृशः तव बत व्याजस्तुतिव्यापृतः
वात्सल्यस्मितमञ्जुला जननि मा मङ्के कदा धास्यसे॥

107) अज्ञाना दुचितं च वस्तु कुपितः पुत्रो यदा नेच्छति
प्रायस्तर्हि जनन्युपायचतुरा वात्सल्यतो ग्राहिका।
भ्रातृभ्यां प्रदिशामि गच्छ ननु रे नान्यत्रलभ्यं तदि
त्याशां येन तनोति तेन हृदयेनालोच्य मा मुद्धर॥

यदि इष्ट मपि वस्तु स्वयं मात्रा दत्तमपि पुत्रेण कोपपरवशेन निराक्रियते तर्हि सा तर्जयति 'तर्हि अहं अन्यस्मै अथवा भ्रात्रे दद्याम्' इति तथा।

108) रात्रौ मातृसुवासिनीपरिमळप्राग्भार सम्भावितं
संव्यानं धृतमुक्त मर्भकवरा आलिङ्ग्य ये शेरते।
तादृक्षा हि वयं स्तनन्धयतया, शब्दोत्तरीयं स्रव
त्साहित्यस्तनसौरभं तव मुहुः वक्त्रेण गाहामहे॥

109) अन्तस्सौध मधीश्वरस्य सविधे सङ्गीतगोष्ठीरता
मध्येकाकलि या शिशो रुदितकं श्रुत्वावरूढा क्षणे।
आदायात्मभवं विनीय रुदितं संमृज्य बाष्पावळिं
नाथस्यान्तिक मात्मनाम्ब नयते वाञ्छामि तामम्बिकाम्॥

110) नित्यं पादपयोजसन्निधिगतं शुभ्रेतराभ्यां शुचा
हस्ताभ्यां कलिताङ्घ्रिजानु मभवे वाञ्छन्त मूर्ध्वस्थितिं।
शुष्कं मूर्छित मार्द्रदर्शनझरीसेकेन सम्बोध्य मां
नासादर्शनमार्जनं विदधती वोढासि मातः कदा॥

111) लालादीन् विसृजन्ति मातृषु सुताः बाल्ये तथाप्यम्बिकाः
न्यस्यन्ति प्रणयाद्विशोध्य जनकोत्सङ्गेषु तान् सक्षमाः।
अस्मानम्ब तमोविलिप्तमनसः संस्कृत्य चैवं शर
ण्योत्सङ्गाय निरञ्जनाय दयया तस्मै दिश ब्रह्मणे॥

112) उग्रो भिक्षु रयं त्रिनेत्रभयदः वीक्षेत साक्षी यदा
त्वाङ्गृह्णाति, नयेत् मदङ्कशयनात् तस्मात् ध्वनिं मा कुरु।
इत्यात्मीयतया तवैव सविधे मां स्थापिका चेद्वदेः
पर्याप्तं मम तावदेव युवयोः रूपं यदि प्रेक्षितम्॥

113) महामाये! चेलांचलवृतघनब्रह्म दशनात्
स्मरस्यम्ब, द्वैधं रहसि दळयिष्यस्यवहिता।
इदं काकोच्छिष्टं मम च गणयन्त्यंशहरतां
यथाम्बा 'त्रैलिङ्गी' दिशसि ननु भागप्रति कदा॥

'काकोच्छिष्टम्' एतत्पदम् आन्ध्रे प्रसिद्धम्। यदा किञ्चित् 'फलम' अथवा भोज्यम् एकमेव द्वाभ्याम् दातव्यम् तदा तत्फलम् वस्त्रान्तरितम् दश्यते। तेन तत् 'उच्छिष्टम्' लालादूषितम् नभवतीति अभिप्रायः। अत्र वस्तुतः 'काक' इति पदस्य मूलम् 'कोक' इति स्यात् यस्य 'वस्त्रम्' इति वाच्यार्थः सम्यक् समन्वेति। अत्रतु 'काक' पदम् एव अर्थकारि। 'क-अक' = 'सुख दुःखे'। दशनम् नाम दशाः करोति दशयति इति ल्युट्। ब्रह्मणः जीवत्वादि दशानयनम्।

114) फलं गङ्गाधारं त्रिनयन मभिन्नं यदि शिशोः
करे दत्तं किंवा भवति फलितं वास्तु लुठितम्।
अखण्डं भिन्दाना यदि रसममुं स्वादयसि चेत्
अखण्डानन्दानां भवति परिपाटी हि जननि॥

115) श्रुत्वा मे रुदितं मदम्ब सहसा बाष्पार्द्रनेत्रा सती
शम्भो रर्धशरीरतो विघटिता द्रष्टुं यदा गच्छसि।
मातूष्णीम्भव, शम्भवे कथय मे वार्तां अपृष्टापि हा!
स्थाणुर्मां स्मरतात् सकृत्फलमतो याथाकथाचं भवेत्॥

116) वक्षोजौ खलु ते सुधाकरमणी मातः पयःपीवरौ
दीप श्चन्द्रकलाधरो हि हृदि ते विष्वग्विकीर्णप्रभः।
मुग्धस्येव मणिप्रदीपकलयोः मण्याशया धावतः
बालस्यास्य भवद्दया यदिभवेत् लभ्येतरं किं भवेत्॥

118) कार्यं कारुण्य मार्येत्यसुरगण इह स्याच्च दोषानुरक्तः
सर्वे किं वापराद्धाः भवति हि प्रकृतिः दुस्त्यजेत्याहरामं।
या सीतामातृता सा पितरमपि तथा सान्त्वयन्ती जिघांसुं
पुत्राघं मन्दयन्ती जननि, तव हृदि प्रार्थ्यते 'स्तन्यबीजम्'॥

119) शृण्वन्ती बाल्यदोषान् प्रतिगृहगृहिणीवर्णितान् आत्मसूनोः
दौर्लालित्यञ्च किञ्चित् ध्रुव मिति मनसा या विदन्ती च माता।
नैतावानीदृगेषोर्भक इति हृदये भाषते निह्नुवाना
तावत्तादृक्क्षमान्धा भव मयि जननी सा यशोदेव वत्से॥

120) क्षुद्रा काकवधूः द्रुमान्तविटपे दूरे कुलाये स्थितं
स्वापत्यं परिरक्षितुं प्रतिकलं तिर्यग्विकीर्णेक्षणा।
पश्यन्ती पदयत्यरीनिति कथा मातृत्वकौतूहलं
त्वय्युद्बोधयतात् कटाक्षकलनाः रक्षन्तु रक्ष्यं हि माम्॥

121) स्तन्यं दत्तवती न चेति विजहौ गृह्णाति नाङ्के बते
त्यादत्ते न भुजेन चेति न च वा मामाह सेत्याग्रहात्।
हिक्काभिः प्ररुदन् पदैः अभिजनान् सन्ताडयन् यः शिशुः
मा मीदृक्ष मुदारया धिषणया मातः गृहाणोरसा॥

122) गभीरस्य व्योम्नः गहनतरनिश्शब्दकुहरे
अरण्यानीमध्ये धरणिधरवाराशितटयोः।
विमुच्याशामोहद्विगुणितभया नम्ब तनुजान्
'असौ मोक्षो बाला' इति खलु हसित्वा स्तनपिबान्॥

123) मात र्मां पाहिपाहीत्यसकृदपि जपन् यत्त्वया न श्रुतोहं
श्रोतुं लज्जे भवत्याः चरितमपि सकृत् संश्रितापन्नधात्र्याः।
अम्बारावान् जनन्यै तृषितनयनको प्येवमेवायुरन्तं
कुर्यादेवेति काचित् स्मृतिरपि हृदयारुन्तुदा हन्ति वत्सम्॥

124) स्तन्यं चेत् न ददाति पीनहृदया माता सुतायान्वहम्
तस्याः उच्छ्वयधोः शिलेयकठिनौ स्यातां स्तनौ बाधकौ।
तस्मान्नात्र दयैव हेतुरिति सम्भाव्या पयोधापने
प्रेमा यद्यनुधाप्यते सहृदया मातेति सङ्कीर्त्यताम्॥

125) व्याघ्रे कण्ठीरवे वा पृथुकभयकरे दृश्यसेचापि, कस्मात्
सृष्टिश्रीः प्रेतपीठे जगदपशकुने पेचकेवासि हन्त।
त्वं लक्ष्मीः पुण्डरीके वस सुतहृदये भक्तिगङ्गाझरस्थे
माता स्याः मङ्गळा स्याः प्रणतवरकरी देवता स्याः मम स्याः॥

126) याने यामि तदा गले मम रवः कम्पात्मको वर्धते
नार्थो नापि पदं समन्वयहितं त्वय्येधते मे मनः।
केका अप्यकृताक्षरस्य च शिशोः अम्बां यथा प्राप्नुवं
त्येवं मे खलु काकलीस्वरशिखा त्वां गाहतां हे उमे!॥

127) अम्बाया अङ्कभागे पृथुक उपहितः स्तन्य मापीय तुष्टः
जिज्ञासास्फारिताक्षः परिसर मभितः तत्र वस्तूनि दृष्ट्वा।
यावज्जानाति चोञ्चोमिति वदति कलं तावदेवाम्ब जाने
तिष्ठन्नङ्के क्षमायाः तव जननि कदा कोहमस्मीति जाने॥

128) वाणी विश्लधितस्तनांशुकलवा मन्ये गुरुप्रार्थिता
स्तन्यं मह्य मुपायनीकृतवती स्तन्योस्मि धन्योस्म्यतः।
तद्गण्डूषशतैः तुषारमधुरैः हे अम्ब हेरम्बवत्
त्वां सिञ्चामि खलु स्तनंधयतया लीलैकशीला भव॥

129) जानेहं चपलोस्मि मर्कटशिशुन्यायेन ते पादुके
गृह्णन् उत्पतनानि ते ह्यनुपतन् लम्बै कियत् साध्वसात्।
'मेनादस्य' किशोर एषक उमे 'मेमेम' इत्युच्चरन्
गूढोत्मा गहनेस्मि 'मे' प्रतिवदन्ती मां द्रुतं स्वीकुरु॥

'मेनादः' = मार्जालः। मम पिता 'मेल्लचेर्वु जगन्नाधशास्त्री - तत्र' मे-नाथ पदांश योः अनुसरणलेशः।

130) ॐकारादहमादि शब्दनिवहं मातुस्तनूजोश्नुते
बाढं स्वप्रतिबिम्बवागपि शिशोः मात्रे हि माध्वीयते।
मातृत्वं खलु वत्सिमा खलु रुचेः हेतुः न वाचो गुणः
तन्मादृग्विकटोदितं विरसमप्यंबास्तुते मोदकम्॥

131) दवीयोदेशस्थम् तनयमपि बन्धुप्रियवृतम्
यथा स्मारंस्मारम् भवति जननी सास्रनयना।
तथैतल्लोकस्थम् परमदुरवस्थम् जननि माम्
रुदन्तम् त्वद्यन्तम् कथमिव निरन्तम् त्यजसि हा॥

132) मात्रुत्सङ्ग गतस्तया न कलितः किञ्चित् प्रतीक्ष्यान्ततः
रुष्टः कष्टमनाः अभीष्टमपि तं देशम् कथञ्चित् जहन्।
लाल्ये बाढमितोनयेति मनुते चैवं तया लाल्यते
गाथैषा मम नेमभागफलिता मातृण माकाङ्क्षति॥

133) उमार्धशम्भुः पदशम्भुरूपा-ओमर्थशम्भुः पदशम्भुरूपः।
शम्भुद्वयाङ्घ्रिद्वयसी ममार्तिः-नमोमनोयुक् सदृशी युवां स्यात्॥

इति स्तन्यधारास्तवः सम्पूर्णः।

శ్రీః

మహాకవి శ్రీకాళిదాస విరచితమ్

మేఘదూతమ్

సంస్కృతవ్యాఖ్యాత్రయసముల్లసితమ్

(సఞ్జీవినీ-బ్రహ్మప్రకాశ-విద్యుల్లతాః)

ఆన్ధ్ర 'మృణాళినీ' వ్యాఖ్యోపేతమ్

ఆన్ధ్రవ్యాఖ్యాత

రావి మోహనరావు, M.Sc., M.A.(సంస్కృతమ్)

లెక్చరర్ - భూవిజ్ఞానశాస్త్రశాఖ,

వి.ఆర్.యస్. & వై.ఆర్.యన్. కాలేజి, చీరాల - 523 157

శ్రీః